CC-0. In Public Domain. Digitization by eGangotri

ग्वालपुलीय गुरुकुल महाविद्यालयस्य सांस्कृतिक मासिक मुखपत्रम्

भारतोदयः

"भारते भातु भारती"

मृदिता संस्कृतिरिह

—डॉ० मिथिलाप्रसादत्रिपाठी
५७-अ, वैशालीनगर, इन्दौर (म०प्र०)

(१)

न कश्मीरः सिन्धुर्नहि च हिमभूमिर्मम कृते
न वाऽस्मद्देशीयाः कथयितुमहो ! सन्ति मुखराः ।
मदीयो नवास्ते बुधजननुतः पाणिनिरल
परैराक्रान्तोऽयं स्मरत न निजां संस्कृतिमिह ॥

(२)

न दर्भो नो गेहे मिलति तुलसी चन्दनमपि
न दूर्वा न प्रातर्जनकजननीपाद—नतयः ।
शिखाग्रन्थिस्तद्वद् धरणिरजसा नास्ति तिलकः
गृहे फिल्मप्राये हफति मृदिता संस्कृतिरियम् ॥

(३)

विभक्तोऽयं देशः क्वचिदथ जनैर्धर्मनिरतैः
न योग्या भोगोक्ताः घटयितुमथो राष्ट्ररसिकान् ।
यतन्ते जात्यैमान् विघटयितुमेवं गतधियः
अहो नो दौरात्म्यं विभजनपरत्वादपि सुखम् ॥

(४)

क्वचिद् भाषाबुद्ध्या क्वचिदपि च वर्णान्वितधिया
क्वचित् सत्तादृष्ट्या विवदनपरा भोगमतिकाः ।
न राष्ट्रैक्यं शक्यं विविधदलभिन्ने धृतफले
तथापीयं लोके मतगणनरीतिः फलवती ॥

(५)

ध्वजान्दोलैर्नैकैः क्वचिदथ च नेतुः प्रवचनैः
क्वचिच्चित्रैर्भव्यैर्भवति दलघोषैरपि तथा ।
क्वचिन्मिथ्याश्वासैर्जयजयकरा सन्ति निरताः
न राष्ट्रे संस्कारं परिणमयितुं केऽपि दलगाः ॥

(६)

सदा निन्दालीना विदधति दलीयाः स्तुतिगिरः
जनाधारं प्रादयै भवति परदोषानुकलने ।
रतियेंषां लोके निखिलजनवेद्या गुणयुता:
कलौ नेतास्ते कपटमतिकाः सन्ति मुदिताः ॥

[शेषाशः २० पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भारतोदयः

संस्कृत-मासिकपत्रम्

वर्षम्-६० अङ्कः-८

डा० हरिगोपालशास्त्री
व्याकरणाचार्यः
एम्०ए०, पी-एच्०डी०
राष्ट्रपति-पुरस्कृतः

सह-सम्पादकः
डा० केशवप्रसाद उपाध्यायः
साहित्याचार्यः
एम्०ए०, पी-एच्०डी०

प्रबन्ध-सम्पादकः
डा० अजयकौशिकः
एम्०ए०, साहित्याचार्यः

प्रकाशकः
गुरुकुलमहाविद्यालयो ज्वालापुरम्
हरिद्वारम्-२४६४०५ (उ०प्र०)

शुल्क-विवरणम्

प्रत्यङ्कम्	—	५/-
वार्षिकम्	—	५०/-
आजीवनसदस्यता शुल्कम्	—	५००/-

विषयानुक्रमणिका

१-श्रुतिसुधा	-महर्षिदयानन्दसरस्वती	३
२-उत्तरे रामचरिते भवभूतिर्विशिष्यते	-डा० जयकृष्णगोदियालः	४
३-सैनिक-नाटिका (४)	-श्रीकृष्णदत्तशर्मा शास्त्री	६
४-श्वेत-माधव-वृत्तम् (१)	-डा० निरञ्जन मिश्रः	१२
५-संस्कृतपुरुषाः व्याकरणाचार्याः डा० वागीशशास्त्रिणः	-डा० ऑस्कर पुजोलः	१५
६-तृतीयं भारतसम्मेलनं सम्पन्नम्	-डा० शशितिवारी	१६

※ गलज्जलिका ※

—डा० रामविनयसिंहः
बी० ३०/२३५, नगवा पाठशाला
नगवा, वाराणसी-५ (उ०प्र०)

भावनास्ताः नताः लम्बता कीदृशी ?
चेद् विमानीकृताः मानता कीदृशी ?

बन्धुता ब्रह्मबन्धुत्वमायाति ते
तत्र काऽबन्ध्यता बन्धुता कीदृशी ?

वाचि वैमल्यगन्धं न चेद् दृश्यते
तत्पुनर्लाशुनीगन्धता कोदृशी ?

शोणशब्देन घोणा घृणाघूर्णिता
भोजने सामिषं धर्मिता कीदृशी ?

नीरवे श्रूयते भाव-कोलाहलः
कीदृशी साधुता मौनता कीदृशी ?

कालमासाद्य सर्वे विनम्रंगताः
वैवशी नम्रता नम्रता कीदृशी ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वालापुरीय–गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भवभावनाभिलाषी ।
भगवति भुवि भक्ति-भावभाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख–ललाम–सञ्चय—प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

वर्षम् – ६० | फाल्गुन २०५६ विक्रमाब्दः फरवरी २००० ईसवीयाब्दः | अङ्कः - ८

श्रुति-सुधा

ओ३म् नाना हि त्वा हवमाना जना इमे धनानां धर्तरवसा विपन्यवः ।
अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हीन्द्र निभृतं मनं तव ॥

—ऋग्वेद १/१०२/५

पदार्थः ~(नाना) अनेकप्रकाराः । (हि) खलु । (त्वा) त्वाम् । (हवमानाः) स्पर्धमानाः । (जनाः) शौर्य्यधनुर्वेदकुशला अतिरथा मनुष्याः । (इमे) प्रत्यक्षतया सुपरीक्षिताः । (धनानाम्) राज्यविभूतीनाम् (धर्तः) धारक । (अवसा) रक्षणादिना सह वर्त्तमानाः । (विपन्यवः) विविधव्यवहारकुशला मेधाविनः । (अस्माकम्) (स्म) हर्षे । पूर्ववदत्र दीर्घः । (रथम्) विजयहेतुं विमानादियानम् । (आ) (तिष्ठ) (सातये) संविभागाय । (जैत्रम्) दृढं वैयाघ्रं विजयनिमित्तम् । (हि) प्रसिद्धम् । (इन्द्र) यथावद्वदरोकाणां रक्षक । (निभृतम्) नितरां धृतम् । (मनः) मनन-शीलान्तःकरणवृत्तिः । (तव) ॥ ५ ॥

भावार्थः ~यदा मनुष्या युद्धादिव्यवहारे प्रवर्त्तेरन्, तदा विरोधेर्ष्या–भयालस्यं विहाय परस्पर-रक्षायां तत्परा भूत्वा शत्रून् विजित्य विजित–धनानां विभागान् कृत्वा सेनापत्यादयो यथायोग्यं योद्धृभ्यः सत्कारायैतानि दद्युः, यतोऽग्रेऽप्युत्साहो वर्धेत । सर्वथाऽऽदानमप्रियकरं दानञ्च प्रियकारकमिति बुद्ध्वैतत् सदाऽनुतिष्ठेयुः ॥ ५ ॥

–महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, ५५१ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तरे रामचरिते भवभूतिर्विशिष्यते

—डा० जयकृष्णगोदियालः
प्रवक्ता, संस्कृतविभागे
गढ़वालविश्वविद्यालयः, पौड़ी गढ़वाल (उ०प्र०)

संस्कृत-नाट्यसाहित्ये यावन्ति सन्ति रूपकाणि तत्र कविकुलशेखरमणेः भवभूतेः उत्तररामचरितमद्वितीयम्। तत्तु रमणीयतया रसिकहृदयैः विद्वद्वृन्दैर्भृशमेवादृतम्।

यद्यपि कविप्रणीतानि सन्ति त्रीणि रूपकाणि, तानि च मालतीमाधव-महावीरचरित-उत्तररामचरिताभिधेयेन प्रथितानि सन्ति, तथापि **'उत्तररामचरितम्'** हि भवभूतेः उत्कृष्टतमं रूपकम्। रूपकेऽस्मिन् कवेः नाट्यप्रतिभा स्वीयं चरमप्रकाशं विकीरन्ती दरीदृश्यते। यद्यपि प्रकृतेर्गभीरत्वाद् कविभिरचितेषु त्रिष्वपि रूपकेषु भावप्रवणता सम्यगवलोक्यते तथाप्युत्तररामचरिते तु तत्प्रभावोऽतितरामेव दृग्गोचरीभवति।

उत्तररामचरिते 'वस्तुनेतारसश्च' इति नाट्यतत्त्वत्रयाणां संघटनं कविः शुद्धव्यावहारिकपद्धत्या विदधाति। विविधभावानां सफलनिरूपणं नाटकस्यास्य वैशिष्ट्यम्। अत्र एकतः स्निग्ध चित्रणं दृश्यते[1]। अपरतश्च प्रकृतेः भयावहं दृश्यञ्च विभेति[2]।

नाटकस्य प्रथमाङ्के कविना चित्रदर्शनस्य या योजना संकल्पिता सा प्रभूतफलदायिनी सिद्ध्यति। पूर्णगर्भायाः सीताया निर्वासनरूप-क्रूरकर्मत्वं चित्रदर्शनमेवापहरति। चित्रावलोकने एव सीताया मनसि दौहृदं समुत्पन्नं, यदासीदचिरेण सम्पादनीयं धार्मिकदृष्ट्या चाधुनिकव्यावहारिकदृशाऽपि। वस्तुतः सीतामनसि समुत्पन्ना पूर्वदृष्टजनस्थानदर्शनेच्छा एव निर्वासनहेतुः किन्त्वत्र कवेर्नाट्यनैपुण्यं स्वतः एव परिस्फुरति। चित्रदर्शनयोजनया सीतास्वाभिमतं दोहदमाप्नोति तथा च रामोऽपि लोकाराधनाय सीतापरित्यागस्यावसरमश्नुते। उभयोरभीप्सितमत्र कथा — सन्नियोजनेनैव सफलतामधिगच्छति। घटनानाम् संयोजने एतादृशी सफलता भवभूतिना मालतीमाधवादिषु रूपकेषु न लब्धा। उत्तररामचरिते वर्णितासु घटनासु मनागपि शैथिल्यं न दृश्यते। तृतीयाङ्के कविना छायासीताविषयिणी या कल्पना कृता, साऽपि तस्य मनोविज्ञानवित्त्वं समभिव्यनक्ति। अनया योजनया सीता दुःखसागरे निमग्नरामकृतप्रशंसां शृणोति, अपनयति च स्वापमानजनितवेदनाम्। अनेन नाट्यचातुर्येण कविः नितान्तदुरूहाण्यपि कार्याणि विनैवायासं कर्तुं क्षमः सञ्जातः।

सप्तमाङ्के या गर्भाङ्कयोजना विलसति, साऽपि कवेः वस्तुसंयोजनसम्बन्धिन्या निपुणताया निदर्शनं विद्यते। एवविधां नाट्यशैलीं वस्तुतो नाट्यकलाप्रवीणो नाटककार एव प्रयोक्तुं क्षमते।

कथासंयोजनवद् पात्रचित्रणेऽपि कविरयं निपुणः। कविः रामं गृहाधिपतित्वेन निरूपयति।

१—उत्तररामचरितम् १/७, ६, ११, १२, १३, १४, इत्यादि
२—उत्तररामचरितम् १/२८, २/६, २/१६, २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगद्क्षणं लक्ष्यमासीत् रामस्य[3]। शम्बूकाद्यसुरान्नपि सः तारयति। कर्तव्यरालनं, प्रजाऽनुरञ्जनं च सः स्वकीयसर्वस्वमपि पत्यिज्य सेवते। धर्म-त्राणार्थं सः अहर्निशं यतते[4]। रामो जानकीमपि समधिकं स्निह्यति[5]। स प्रजारञ्जनाय एव सीतां मुमोच, परं स कदापि तां न विसस्मार। एवमेव नाटकेऽस्मिन् सीतायाश्च चरित्रमप्यतितरां सुललितम्। नाटके सा रामार्थं सर्वं सेहे। सा छायेव तमनुजगाम। निर्वासिताऽपि सा रामे न क्रुध्यत, आत्मानं एव पुरोभागिनीं मेने। सीतायाश्चरित्रस्य या नैसर्गिकी शुद्धता भवभूतिना उत्तररामचरिते वर्णिता, सा तु संस्कृतनाट्यसाहित्ये वर्तते सुविख्याता[6]। अन्यान्यपि सर्वाणि पात्राणि कविना कुशलतया वर्णितानि सन्ति।

भवभूतेः नाट्यकलायां वैदुष्यस्य कल्पनायाश्च समन्वयश्चकास्ति। रसप्रतिपादनेऽपि भवभूतेर्भारती उपमानशून्यैका। करुणरसनिरूपणे त्वस्य दिग्दिगन्तरालव्यापिनीं कीर्तिं जानन्ति एव सर्वे काव्यरसज्ञाः[7]। शृंगारे करुणे च कविना कोमलकान्तपदावलिप्रयुक्ता तथा रौद्रे वीरे चोत्कटकठोरदीर्घतरसमासबहुला शैली। भावानुकूलशब्दसंयोजने भवभूतेः नैपुण्यं सुविदितमेव। तदीयं लक्ष्यमेवेदं यद् गूढातिगूढानि तत्त्वानि प्रकाशमृच्छेयुः।

दशरूपक-साहित्यदर्पणादिकेषु लक्षणग्रन्थेषु आचार्यैः विवेचितं यद् —

'एक एव शृङ्गारो भवेदङ्गी वीर एव वा[8]।
अङ्गमन्ये रसाः सर्वे कार्यं..... ॥'

लक्षणनिर्धारणावसरे लाक्षणिकानामाचार्याणां सम्मुखे शृंगार—वीररस—प्रधाननाटकानामेका दीर्घतरा शृंखला विद्यमाना आसीत्। समुपलब्धनाट्यपरम्परामवलोक्यैव विद्वद्भिः शृंगार—वीररसस्य वा प्राधान्यं तथा चान्येषां अंगत्वेन निरूपणं प्रतिपादितम्। भवभूतिना शृंगारप्रधानमालतीमाधव — वीररसप्रधानमहावीरचरितदृश्यकाव्यद्वयस्य रचना तु कृतैव, किन्त्वनेन काव्यज्ञेन शास्त्रनिपुणेन च महाकविना सुनिश्चितां पूर्वपरम्परां स्वीकृत्येका नवीना नाट्यपरम्पराऽपि स्थापिता। अनेन विद्वद्वरेण करुणरसप्रधानमुत्तररामचरितनाटकं रचितं तथा चात्र करुणस्य प्रथमा स्थापनापि कृता। कविः करुणमेव प्रधानं रसं मन्यते। कवेः उद्भावनेयं सर्वथा नवीना। इयं करुणप्रधानात्मिकां रीतिमनुसृत्यैव परवर्तीनाट्यसाहित्ये शान्तादिरसानामपि रसराजत्वेन कविवर्यैः स्वरूपकेषु स्थापना कृताऽस्ति। यथा उत्तररामचरिते कविः भवभूति विवेचयति—

एको रस करुण एव[9] निमित्तभेदान.....

इत्यादि तथैव 'संकल्पसूर्योदये" दाक्षिणात्येन प्रोक्तम्—

शमस्तु परिशिष्यते[10] शमितचित्तखेदो रसः।

उत्तररामचरितस्याध्ययनपूर्वकमिदं वक्तुं शक्यते यद् नाटकेऽस्मिन् कवेः नाट्यप्रतिभा अतितरामाकर्षयति पाठकान्। समस्त-नाट्यतत्त्वसन्नियोजनदृष्ट्या करुणरसाभिव्यञ्जनादृष्ट्या वा सुष्ठु भणितं केनचिद् समालोचकेन—

'उत्तरे रामचरिते भवभूतिर्विशिष्यते।'

३—उत्तररामचरितम्, १/१२, ३/३०
४—तत्रैव, १/१०
५—तत्रैव, १/३८, ३९, ४२, ४३, ४५, ३/३८, ४५
६—तत्रैव, १/१३, १४
७—तत्रैव, ३/४७
८—साहित्यदर्पणम्, ६/१०
९—उत्तररामचरितम्, ३/४७
१०—संकल्पसूर्योदयः १/१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सैनिक–नाटिका (४)

—श्रीकृष्णदत्तशर्मा शास्त्री
सेवानिवृत्त-सहजिलाविद्यालयनिरीक्षकः
८१, जवाहरगंज, हापुड़ २४५१०१, गाजियाबाद (उ०प्र०)

भारतीयाः स्वभावत एव प्रत्युत्पन्नबुद्धयो भवन्ति ।

नटी —

अपि गूढचरा युद्धविद्याविशारदा भवन्ति ?

सूत्रधारः —

नास्तीदृश एकोऽपि जनः सेनायां यो युद्धकर्मणि प्रदीक्षितो न भवेत् । समये चाप्ते योद्धुं न शक्नुयात् ।

नटी —

आर्य ! 'चीन'—देशसैनिका नायकाश्च निर्दया एव न अपितु क्रूरा अपि भवन्ति । परन्तु धन्यो भारतीयो जनः ।

सूत्रधारः —

मुग्धे ! विदितं भवेत्—

संग्राम — भूमीगत—भारतीयाः
सुशासिता मातृधरानुरक्ताः ।
दुःखेष्वपीमे रणभूमिमल्लाः
शत्रोश्चमूं नाशयितुं समर्थाः ।।

भारतयोधकानां शौर्यं, देहबलं, प्रज्ञाबलं, धैर्यं, संग्रामविद्याबलं बुद्धिचातुर्यञ्च वैदेशिकैर्युद्धकलाविशेषज्ञैर्बहुशः प्रशंसितम् ।

नटी —

आर्य ! इदं वक्तुं शक्यते यत् भारतीयः सैनिकः समराङ्गणमवाप्य मृत्योरपि न बिभीति ।

सूत्रधारः —

भारतीयः सैनिकस्तु सर्वं पृष्ठे कृत्वा, प्राणानप्यगणयन् शत्रोर्विनाशायैव युध्यते । भारतीयः सैनिकस्तु—

निर्वर्ण्य मृत्युं समुपस्थितं वै,
सिंहायते नैव मृगायते सः ।
कण्ठे गृहीत्वा प्रसभं स्वकालं
कालालयं प्राययितुं समर्थः ।।

नटी —

आर्य ! अपीदं सत्यम्, क्षतविक्षताङ्गः, शोणितशोणशरीरः, क्षुत्तृड्पीडितो, भुवि शयानोऽपि योद्धुं कामयते ?

सूत्रधारः —

दुर्दशामापन्नो, यमदृग्गोचरतां गतोऽपि भारतीयः सैनिको मातृभूमिं बहुमन्यते । मृत्युकाले समुपागतेऽपि भारतीयो वीर-सैनिकः सदैवेदमेव वाञ्छति—

मातः ! न किञ्चिन्मम वस्तुजातं
यच्छोणितं देहगतं न तन्मे ।
प्राणाश्च मे नैव न जीवनञ्च,
यत्किञ्चिदत्रास्ति तु तत्त्वदीयम् ।।

नटी —

आर्य ! सङ्ग्रामभूमिस्थलदृश्यं तु महा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारूणिकम्, अतिभयङ्करं, भयावहं च भवितव्यम् ।

सूत्रधारः —

आर्ये ! युद्धाङ्गणे सर्वत्र वैभत्स्यमेव दृश्यते । तस्य तु कल्पनापि दुःसहा भवति । [नेपथ्ये —गुलिकाप्रक्षेपणं, वायुयान — गर्जनं, कोलाहलश्च श्रूयते ।]

नटी —

आर्य किमेतत् ?

सूत्रधारः —

मुग्धे ! युद्धं प्रवर्तितं प्रतीयते । आगच्छ, गृहमुपयावः ।

[उभौ निष्क्रान्तौ]

(यवनिकोद्घाटनम्)

(केचित् सैनिकाः शोणितपरीताङ्गाः क्षतविक्षत-शरीरा भूमौ शेरते । तेषु एको मरणासन्नः समीपस्थ एकोऽन्यो विक्षताङ्गः, जलकूपिका-स्वल्पजलसनाथापि वर्तते । शस्त्रास्त्राणि चापि इतस्ततः दृश्यन्ते ।)

एकः —

जलम् । ज — ल — म् ।

अपरः —

हा ! हन्त ! सखा जलं याचते ।

एकः —

ज —ल — म् ।

अपरः —

सखे ! धैर्यं धारय । जलं समर्पयामि !

(जलकूपिकाम् आदातुं यतते)

एकः —

ज — ल — म् ।

अपरः —

(सकष्टं जलकूपिकाम् आदाय पश्यति, स्वल्पम् अपर्याप्तं जलं त्रिलोक्य खिद्यते, सखायं जलं पाययति)

सखे ! जलं पिब !

(एकस्य मुखे जलं पातयति)

एकः —

सखे ! नाहं प्राणान् धारयितुं क्षमः । शीघ्रमेव दिवं प्रयास्यामि । वचनं मे सावहितः शृणु ।

अपरः —

सखे ! नैराश्यं मा वह ! वीरः कदापि न म्रियते । मृतिमवाप्यापि वीरः सदैव अमरस्तिष्ठति यशःशरीरेण ।

एकः —

सखे ! मृतिर्मे समुपस्थिता । प्राणा निर्गन्तुकामा एव । अतः पूर्वं यत् प्रार्थये, तच्छृणु ।

अपरः —

सखे ! यथेप्सितं ब्रूहि, किं करणीयं वर्तते ?

एकः —

सखे ! विश्वसिमि त्वं शीघ्रमेव विरोपित-व्रणो भविष्यसि । स्वगृहं चापि त्वया गन्तव्यम् ।

अपरः —

स्वकीयम् अभीष्टं वद !

एकः —

तदा स्वजना अपि मे दृष्टव्याः ।

अपरः —

अवश्यमेव ।

एकः —

मम गृहं गत्वा सर्वप्रथमं माता मे दृष्टव्या, जरातुरा सा स्व—प्रकोष्ठे खट्वारोढा भविष्यति । त्वां परिचीय सा प्रक्ष्यति 'अपि मम पुत्रः कुशली ?' तदा तु तथ्यं नोद्घाटनीयम् । 'मृतोऽसौ' नैतद् वाच्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपरः —

किमाचरणीयम् तत्र ?

एकः —

सखे ! तस्याः प्रकोष्ठे प्रकाशमानो दीपको हस्तेन निस्तेजः करणीयः। इत्थं संसूचयेः **'कुलदीपकस्ते त्वस्तं गतः।'**

अपरः —

अप्येतदपि करणीयं भविष्यति ?

एकः —

तत्रैव शिथिलाङ्गः, कासपीडितः, प्रक्षीण-दृष्टिः सलगुडो मे जनकोऽपि स्थास्यति। सोऽपि मत्कुशलमवगन्तुं समुत्सुको भवेत्।

अपरः —

अथ किम् ?

एकः —

यदासौ पृच्छेत् **'अपि कुशली मे पुत्रः ?'** तदा तु न किमपि उक्त्वा तद्हस्तगतं तदाश्रयभूतं लगुडं भूमौ निपात्य संसूचयेः **'वार्धक्याधारस्वरूपः पुत्रो गतः पुनर्नागमनाय।'**

अपरः —

महद्दुःखकरं भविष्यति।

एकः —

सखे ! स्वसापि मे त्वामुपायास्यति। तस्यैअपि सत्यं न निवेदनीयम्। सा अतीव मृदुल—हृदया वर्तते।

अपरः —

तत् किं विधेयम् ?

एकः —

किमप्यनुक्त्वा निजमणिबन्धगतं रक्षासूत्रं विच्छिद्य भूमिगतं कुर्याः। इत्थं सा विज्ञास्यति **'भ्राता मे न जीवति।'**

अपरः —

हा ! हन्त ! कथम् एतत् करिष्येऽहम्।

एकः —

सखे ! अतोऽप्यधिकं कष्टकरं श्रोतव्यं वर्तते ?

अपरः —

सखे ! तदपि श्रोष्यामि।

एकः —

तत्र, मामेव सर्वस्वं मन्यमाना, मे सद्या नवोढा भार्याऽपि त्वां मे मङ्गलं ज्ञातुमना लज्जानताननाः समुपागमिष्यति तु स्वहृदयं वज्रकठिनं विधाय, किमप्यनुक्त्वैव तस्याः सौभाग्यसूचकं शीर्षस्थं सिन्दूर-तिलकं स्वहस्तेन अपाकुर्याः।

अपरः —

सखे ! तस्याः सीमन्तसिन्दूरविधानं कथम् अपाकर्तुम् शक्ष्ये। इदन्तु हृदय-निखातप्रखरशल्यमिव कष्टकरं प्राणहरं भविष्यति।

एकः —

सखे ! जलम्।

अपरः —

(सकष्टं तदवशिष्टमपि जलं पाययति) सखे ! एतन्मात्रमेव अवशिष्टं वर्तते।

एकः —

अधिकं नापेक्षिष्यते। एतदपि पर्याप्तम्। शृणु तावत् दुर्दैवहतकाः मदीया निरीहाः पुत्रा अपि तत्रैव समुपस्थायन्ति। तदा तान् करे गृहीत्वा प्रसभं तेषां जनन्याः करयोः निदध्याः।

अपरः —

हा हन्त ! कीदृशो निर्घृणस्त्वम्। विधे ! किं किं सोढव्यं वर्तते — **'हतविधिनिहतानां हा विचित्रो विपाकः।'**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकः —

भ्रातः ! देवदूताः समुपस्थिताः । प्रयाणकालः सन्निकटः । प्रणौमि ।

(एकमपि वाक्यं निगदितुं न समर्थः, शनैः शनैः क्षीणदशामुपैति । करेण मातृभुवो रजो गृहीत्वा शिरसि धारयन् 'मातः ! न·····किञ्चिन् ·····म·····म वस्तु जा·····तम्' इति निगद्य निष्प्राणो भूत्वा भुवि शेते)

(नेपथ्यात्—)

स्वजन्मभूगौरवरक्षका ये
स्वप्राणदानाय सदोत्सुका ये ।
वीरा यशस्काः सुरलोकपान्था
नित्यं नमस्याः किल सैनिकास्ते ।।

(नमस्तः पुष्टवृष्टिः भवति ।)

(पटाक्षेपः)

[पञ्चमः दृश्यः]

(प्रविशतो नटी सूत्रधारश्च)

नटी —

आर्य ! स्वदेशाय हुतप्राणोऽसौ सैनिकः स्वर्गं गत एव यतो देवास्तं पुष्पवृष्ट्या सभाजयामासुः ।

सूत्रधारः —

आर्ये ! नास्त्यत्र शङ्कापङ्ककलङ्कावसरः । सः देवलोकमेव आससाद । नभस्तः पुष्पवृष्टिस्तु विलोकिता एव ।

स्वर्गस्थदेवाः कुसुमोपहस्ताः
सदारपुत्रा भवनानि हित्वा ।
तत्रोपपन्नं सुभटं विभाव्य
तन्मानहेतोः समुपागतास्तम् ।।

नटी —

आर्य ! एतेनैव नालम् । एतदपि श्रूयते—

रम्या मनोज्ञा सुखदाः सुवर्णाः
कौशेयवस्त्रावृत — शुभ्रगात्राः ।
सदैकरूपा नवयौवनाप्ता
वाञ्छन्ति ता भारतवीरयोद्धान् ।।

सूत्रधारः —

कथन्न ! ते भवन्त्येव एतादृशाः । ते राष्ट्रार्थम् एव जायन्ते, राष्ट्रार्थाम् एव श्वसन्ति, राष्ट्राहितायैव प्राणानर्पयन्ति ।

नटी —

आर्य ! समराङ्गणे संल्लब्धजीवनेन सैनिकेन तस्य मृतसैनिकस्य बान्धवाः नूनमेव विलोकिताः स्युः ।

सूत्रधारः —

आम् ! चिकित्सकानाम् 'अथक'प्रयासैरसौ यथासमयं विरोपितव्रणः स्वस्थशरीरः संजातः । ततः किञ्चित् कालानन्तर स्वगृहं गमनाय मतिं चकार ।

नटी —

अथासौ सेनानायकेन समनुज्ञातः स्वगृहं समागतः । स्वबान्धवान् उपेत्य सुखमनुबभूव ।

सूत्रधारः —

तस्य स्वजना अपि मुदमावहन् । अन्येऽप्युरेवासौ तस्य सैनिकस्य गृहमाप । तदानीं युवकसैनिकोऽस्थिरचित्तः समुद्विग्नमना आसीत् ।

नटी —

एतत्तु भवितव्यमेव ।

सूत्रधारः —

वज्रकठिनं हृदयं विधायैव युवकसैनिकोऽसौ वृत्तान्तं निवेदयितुम् आत्मानम् तत्परम् अकार्षीत् ।

नटी —

हृदयविदारकः समाचारस्तेन कथं प्रदत्तोऽभवत् ?

सूत्रधारः —

प्रत्यक्षं पश्य, सैनिको गृहं समागतः ।

(उभौ निष्क्रान्तौ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(यवनिकोद्घाटनम्)

(खट्वासीना वृद्धैका, समीपे प्रकाशार्थं लघुदीपकः मन्दं मन्दं प्रकाशते, समीपे एव द्वितीया खट्वा वर्तते। युवक—सैनिकः प्रविशति)

सैनिक युवकः —

(वृद्धामुपगत्य) मातः ! प्रणमामि।

वृद्धा —

चिरं जीव वत्स ! कस्त्वम् ?

युवकः —

रणधीरस्य सखा धीरसिंहः।

वृद्धा —

धीरसिंह ! वत्स ! एहि मामुपागच्छ। (धीरसिंहः तामुपयाति, वृद्धा तस्य गात्राणि स्पृशति) वत्स ! दीर्घायुः भूयाः। पुत्र ! कदा समागतोऽसि ?

युवकः —

(सोद्वेगम्) मातः ! ह्य एव गृहम् आगतवान्।

वृद्धा —

पुत्र ! रणधीरस्तु कुशली ?

युवकः —

मातः ! रणधीरस्तु मातुरङ्के सुखमास्ते।

वृद्धा —

सम्प्रति कुत्र भवेत् ?

युवकः —

मातः ! (खेदमावहन्, समुत्थाय प्रज्वलितं दीपकं करेण निष्प्रभं विदधाति)।

वृद्धा —

वत्स ! दीपः कथं निष्प्रभो विहितः ?

युवकः —

मातः ! दीपवत् कुलदीपकोऽपि गतः।

वृद्धा —

हा ! हन्त ! किं श्रृणोमि।

(तदैव जीर्णशरीरः, वामकरेण स्वोपनेत्रं सम्भालयन्, धृतकीचकांशो वृद्ध एकः समायाति)

वृद्धः —

कः संल्लपति भोः ?

युवकः —

धीरसिंहोऽस्मि तात !

वृद्धा -

अन्धकारः कथम् ?

वृद्धा —

सम्प्रति गृह एव किं सर्वत्र तम एव तमः। कुलदीपक एव यदा अस्तंगतस्तु दीपकेनैव किं प्रयोजनम्।

वृद्धः —

किमुच्येत ? अपि वार्धक्यं मे निराश्रितं जातम् ! गतं किं मे समालम्बनम्।

(युवकः समुत्थाय तद्गृहीतां यष्टिकां भूमौ पातयति)

हा ! दुर्दैव ! मम पुत्रक एव दृग्गोचरतां नीतः। निःसहायोऽहम्।

(ससम्भ्रमं युवतिरेका प्रविशति)

युवतिः —

अयि ! धीरसिंहस्तिष्ठति ? कथमत्र औदास्यम्। सर्वं एव कथं निस्तेजसः ? अनुजस्तु मे सकुशलः ?

युवकः —

तद् विषये किमपि कथनेन अलम्।

युवतिः —

किम् ? (युवको मणिबन्धबद्धं रक्षासूत्रं संत्रोट्य भूमौ निपातयति, कथयति च)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युवकः —

देवि ! यत्पूर्वं विधिना ललाटलिखितम्
तन्मार्जितुं कः क्षमः ?

युवतिः —

हा हा ! कालो बलीयान् !

युवकः —

देवि ! न कोऽपि तं प्रतिकर्तुं क्षमः ।
(सहसा पुत्रद्वयेन सह महिला एका प्रविशति । वृद्धा च तां स्वसमीपम् आगमनाय सङ्केतयति)

वृद्धा —

वत्से ! उभे ! अत्र एहि ।
(उमा वृद्धामुपयाति)
वत्से ! विचित्रा दैवगतिः ।

उमा —

मातः ! भवत्याः पुत्रस्तु.....।

वृद्धा —

कथितं न, विचित्रं विधेर्विधानम् ।
(उमा गृहागतं सैनिकं प्रतिप्रपश्यति)

युवकः —

अत्र किमपि न वाच्यम् । देवि !
(इत्युक्त्वा सौभाग्यसंसूचिकां सिन्दूररेखां दक्षिणकराग्रेण मार्ष्टि ।)

उमा —

हा हा ! दौर्भाग्यं मे ! एतदपि दृष्टव्यम् आसीत् । (बालकौ समाश्लिष्य) एतयोः किं भविष्यति ? हा विधे ! किं ते हृतमस्माभिः ? अबोधयोरपि करुणा न कृता ! द्वावेवानाथौ ।

युवकः —

(बालकौ करयोः निगृह्य तयाः मातृकरे समर्पयन्) देवि ! त्वमेव एतयोः सर्वस्वम् ।

पुत्रौ —

मातः ! कथं साम्बुलोचना ? किमप्रियं घटितम् । कथमावाम् अनाथौ ? अनाथनाथो विश्वनाथ एव नाथः सर्वेषाम् ।

उमा —

वत्सौ ! युवयोः जनकः सुरलोकपान्थोऽभवत् । समराङ्गणे शत्रुभिः सः हतः ।

पुत्रौ —

मातः ! मा रोदीः । आवां सैनिकौ भूत्वा शत्रुभिः सह संयुध्य पितृवधप्रतिशोधं संशोत्स्यावः ।

उमा —

(पुत्रौ चुम्बति ।) वत्सौ ! रिपुमानमर्दकौ स्वदेशभक्तौ, कुलदीपकौ, भूयास्तम् । तद्दिनदर्शनलालसयैव प्राणान् धारयिष्ये । चिरंजीविनौ भूयास्तम् ।

वृद्धः —

वत्सौ ! (समाश्लिष्य) सिंह—विक्रमौ भूयास्तम् । चेदद्य द्वितीयः पुत्रोऽभविष्यत् तमपि तदातु देशाय अदास्यम् ।

वयं जीवेम वा न जीवेम,
भारतं सदा जीवेत् ।

वृद्धा —

ममाप्ययमेवाभिलाषः । देशः स्वाधीन एव तिष्ठेत् ।

पुत्रौ —

(परस्परं गायन्ति)

वयं भारतीयाः वयं भारतीयाः
वयं मातृभूमेः सुता वीरपुत्राः ।
वयं सिंहपुत्राः वयं सिंहकल्पाः
वयं देशसेवानुरक्ताः सुपुत्राः ।
वयं भारतीयाः, वयं भारतीयाः ॥

(पटाक्षेपः भवति)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वेत-माधव-वृत्तम् (१)

—डॉ० निरञ्जन मिश्रः, प्राध्यापकः
भगवानदास-केन्द्रीय-आदर्शसंस्कृतमहाविद्यालयः
प्राचीनावधूतमण्डलाश्रमः, हरिद्वारम् (उ०प्र०)

[अथ 'मन्त्रणा' नाम प्रथमांशः]

(१)

या नेतुर्हृदयारविन्दमधुरास्वादप्रमत्ता तथा
स्वार्थाम्भोधिविनिर्गता गुणवती पद्मालयेष्वाधुना ।
स्वीयालिङ्गनतः करोति सुजनं दौर्जन्यभावप्लुतं
वोटाकुञ्चनकर्मदृष्टविभवा शक्तिस्सदा पातु सा ।।

(२)

देशेऽस्मिञ्जनपालको भवति यः संख्यावलः शक्तिमान्
तस्येवात्र चरित्रचिन्तनधिया काव्यम्मया लिख्यते ।
अन्येषां गुणदोषयोर्भवति वै चर्चा सतां सङ्गमे
संख्यावृद्धजनस्य पादयुगलं सद्भिस्सदा सेव्यते ।।

(३)

आसीत्तत्रं युधिष्ठिरस्य समये नन्दात्मजो माधवः
यो गोपीजनमानसाब्जमधुपः केकीशिखाभूषितः ।
यः शंखाब्जगदासुदर्शनधरः प्रीतिप्रियः शक्तिमान्
नो तस्यात्र विवेचनं, युगबलाच्छ्वेतोऽधुना माधवः ।।

(४)

कदाचित् यादवास्सर्वे चत्वरे समुपागताः ।
द्वापरेऽसीत् यथा कृष्णः तथैवैकोऽभवद् गुरुः ।।

(५)

नायं चर्चितपूर्णपीतवसनः केकीशिखाभूषितः
यो गोपीजनमध्यरासनिरतो वृन्दावनोद्धारकः ।
आयाते विकरालकालसमये कार्यानुकूलाकृतिः
पीतालङ्करणं विहाय मनसा श्वेतोऽभवत् माधवः ।।

(६)

दृष्ट्वा तत्र समागतं निजजनं प्रीतिप्रदो माधवः
सद्वाक्यं निजगाद फुल्लमनसा शृण्वन्तु मे बान्धवा ।
यत्रास्माकमुदीयमानसमयो यातः पुरा द्वापरे
तत्रैवाद्य चलन्तु बाहुबलिनः कालिन्दिवूले घने ।।

(७)

सर्वे माहिषकुद्धयः प्रचलिताः निर्देशिते निर्जने
अन्येषां गमनं न यत्र भवति स्वीयानुकूलञ्च यत् ।
प्राप्य स्थानमिदं प्रफुल्लमनसामायोजितैका सभा
मुख्यत्वेन समर्थितः स्थितजनैः श्वेतप्रियो माधवः ।।

(८)

अध्यक्षोऽयमुपस्थितोऽभवदिह स्वोच्चासने सत्वरं
दृष्ट्वाशीघ्रमुपैतिबन्धुविषवान् हित्वा यथाश्वाशुनीम् ।
येनेदं मम भाषणं निजजनाः शृण्वन्तु चाशंससमं
उच्चैः रासभकल्पितेन वचसा सम्बोधयन्नब्रवीत् ।।

(९)

येनास्माकमियं सभा प्रचलिता जानन्ति तत्कारणं
सर्वे चात्र समागताः स्वजनताप्रान्तस्य ये नायकाः ।
नीतिर्यापि भविष्यतीह रचिता प्रारब्धसम्पादिका
लोके सा प्रगमिष्यतीति नियता जानामि मे बान्धवे ।।

(१०)

कंसो राज्यमलङ्करोति धिषणाहीनः स उग्रात्मजः
भीतास्सन्ति जना वने वनपतिं दृष्ट्वा यथावन्यजाः ।
केचित्तत्रनमन्ति दण्डभयतश्चान्ये स्वसिद्ध्यर्थिनः
नैते कष्टनिवारकास्सुमतयो नो वा सुरक्षार्थिनः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(११)

तेषां प्रीतिरियं तथा नरपतौ पुष्पे यथा षट्पदां
सिद्धे स्वार्थनिधौ नयन्ति पुरतो जानन्ति शंचान्यकम् ।
ग्रामश्वा न सदोपचारनिरतो द्वारि स्थितः स्वामिनः
अन्यं सत्वरमेति भावभरितो दृष्ट्वा करे रोटिकाम् ।।

(१२)

तन्त्रोऽयं जनतानुरागसहितः पक्षस्थितिं विभ्रति
कार्या नात्र विचारणा गुणनिधिः को वाऽगुणाब्जप्रियः ।
राज्यारोहणयोग्यतां विदधति स्वान्तप्रियः कौरवः
नैकाकी कृतजीवनो गुणनिधिः सर्वात्मकः केशरी ।।

(१३)

राजा यं च यथा स्थितो नरपतिस्थानेऽधुनाऽकण्टके
तत्र प्रीतियुता मदीयधिषणा दण्डप्रिया वर्तते ।
मूर्खाः स्मो निजबाहुवीर्यपरिधावारक्षितो भूपतिः
तद्दासत्वमवाप्य मोदभरिताः सौख्यं विजानीमहे ।।

(१४)

बुद्धिस्ते विपरीततामधिगतात्मानं न यत् पश्यथ
दासत्वस्थितमानसंहिसदने शान्तिः किमेति क्वचित् ?
कष्टाधिक्यमवाप्य चापि सततं भारं वहामि प्रभोः !
सत्यञ्चाभिहितं यदश्वतुलनामायान्ति नो गर्दभाः ।।

(१५)

रे रे यादव ! नन्दवंशविपिने कोऽयं स्थितः केशरी
यस्मात् भीतिमुपागतोऽसि वदनं नो दृश्यते सस्मितम् ।
प्रारब्धं मनसाऽऽमनन्ति सततं मूढाः खलाः दुर्जनाः
धातारं परिवर्तयन्ति गुणिनः कीर्तिप्रियाः सज्जनाः ।।

(१६)

त्वञ्चातीव भयङ्करोऽस्यरिवधे चात्मप्रियालुञ्चने
स्थित्वा वज्रशिलेव मेघपतने कार्यस्य संसाधने ।
किन्नो योजयसि प्रभावमतुलं राज्याधिकारे स्वयं !
सत्यं वर्षमशीति ते न शिशुता मुञ्चत्यहो चित्रकम् ।।

(१७)

सिंहः काननजातजीवहननं कृत्वा कथम्मोदते
स्वीयं वंशमपि प्रमथ्य जलधौ नो मोदते किं तिमिः ?
नीत्वा जीवनदं रसं सुकलिकां त्यक्त्वा द्विरेफः सुखी
दैवो दुर्बलघातको विनयता सम्वर्द्धिता शोषणे ।।

(१८)

सत्यं पश्य सदा ह्यसत्यविरतो दुःखाब्धिमग्नो हरिः[1]
विश्वामित्रसमो नरः कुटिलधीः संसाधयत् स्वार्थजम् ।
त्रेतायामपि रावणेन विजिताः शक्रादयो देवताः
नित्यं धर्मसमाश्रितास्मितमुखी सीता गता कण्ठताम् ।।

(१९)

दण्डे सर्वगुणः स्वदण्डनिहितास्सर्वा स्थिता नीतयः
दण्डाधारमवाप्य नाकगतयः देवप्रिया कीर्तयः ।
शान्तं सत्वगुणाश्रितं न जनताः राज्यश्रियालङ्कृतं
कुर्वन्त्यत्र, महीपतित्वमधुना दण्डे तथा दुर्जने ।।

(२०)

सर्वे दण्डमुपाहरन्तु जनताः कुर्वन्तु पक्षाश्रयाः
नाट्येन प्रतिबोधयन्तु सततं रक्षां करिष्याम्यहम् ।
सर्वेभ्यो निजगौरवं सुनियतं राज्ये समासादिते
नो भीतिर्नच कापि कष्टकलिता गाथा समायास्यति ।

१— हरिश्चन्द्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(२१)

कार्याकार्यविवेचकस्त्वमसि भो ! राज्यं त्वदीयं धनं
त्वत्कार्याय भवन्ति राष्ट्रपतयो दासत्वभावाश्रयाः ।
दुःखाब्धौ विनिमज्जिताः कथमहो सर्वे स्वराष्ट्रेऽधुना
आगच्छन्तु मदीयचिह्नसविधे, पश्यन्तु राष्ट्रं पुनः ।।

(२२)

योऽयं राष्ट्रपतिः स्वकार्यरहितो नामात्मको वर्तते
जानीहि प्रतिचित्रकर्मनिपुणैरालेखितः केशरी ।
श्रुत्वा ते मधुभाषणं तव विधावेष्यन्ति जनताः स्वयं
श्रुत्वा चात्मविशेषणं न मृदुता कस्याधिकं जायते ।।

(२३)

एतेनापि न चेत् व्रजन्ति जनताः पक्षे तदाशृणु
वंशप्राप्तसुचण्डदण्डगुरुतां सर्वत्र विज्ञापय ।
आदौ कुण्ठितमानसाः सुनियता नूनं भविष्यन्ति ते
भूतोऽपि प्रपलायतीति भयतो दण्डान्न किं मानवः ।।

(२४)

नीतिमिमामनुसृत्य सदस्याः
लोकमनांसि विजित्य सगर्वाः ।
राजपदस्थितभावविलासे
दत्तमनांसि भवन्त्वभिलाषः ।।

★ इति 'मन्त्रणा' नाम प्रथमांशः ★

[अथ द्वितीयांशः]

(१)

कालोऽयं न कदापि बद्धनियतिर्नित्यं परावर्तितं
रूपं बिभ्रति चण्डतापलसितं वासन्तिकं वा क्वचित् ।
यः प्राची मुखरागरञ्जनकरः सायं प्रतीचीमुखं
चुम्बत्यत्र करोमि किं विधिगतं कार्यं सदा सिद्धिदम् ।

(२)

मेघो वर्षति सागरे न सिकता भूमौ तदा किं मम ?
श्रव्याकोकिलकाकलीविरहिणीमातापथत्यत्र किम् ?।
चन्द्रं नैति यदि प्रिया कमलिनी किम्बा मया साधितं
दुष्टा एव यदि स्वराजभवने संस्थापितास्तेन किम् ? ।।

(३)

दुष्टास्सन्तु भवन्तु विज्ञचरणाः किं वा मदीयं भवेत्
सर्वे स्वार्थवशाः वसन्ति भवने तेषान्न दोषः क्वचित् ।
पश्यामो नयनाटकस्य रूचिरं दृश्यं परावर्तितं
मञ्चे तिष्ठति नायकः प्रथमतश्चान्ते रिपुस्तिष्ठति ।।

(४)

नो विज्ञे मधु भोजनं न रसनाऽऽस्वादं विना, दुर्जने
का प्रीतिर्मम राजनेतृचयने सर्वे समत्वं गताः ।
याथातथ्यमिदं लिखामि, नयने दृष्टं गतं कर्णयोः
राज्याधिष्ठितमानसस्य वचनं कार्यादिकञ्चाद्भुतम् ।।

(५)

आसन्दस्थितभीमकायवदनो लब्धश्रिया भूषितः
नक्षत्रैरपि सेवितो निशिपतिर्नैतत् प्रभाभूषितः ।
स्वीयानूतत्रजनान् विलोक्यपरितश्चोच्चैर्यदासोऽब्रवीत्
दृष्ट्वा दिव्यमुखाकृतौकुटिलतांयातोऽद्भुतोविस्मयम् ।।

(६)

हे मे मानसराजहंस ! जनतानास्थ ! त्वया किं कृतं
येन प्राप्तमनोरथो गुणनिधिः त्वं भोः ! स्वलोकेऽधुना ।
किं मन्त्रैरिह मोहिताः स्वजनताः किं वा कृतं सेवनं
तत्सर्वं कथयप्रभुत्वरमण ! श्रोतुं पिपासास्ति मे ।।

[क्रमशः]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृत–वर्षोत्प्रेरकाः पण्डितप्रवराः व्याकरणाचार्याः भाषाशास्त्रविशारदाः

सस्कृतपुरुषाः डॉ० वागीशशास्त्रिणः

—श्री ऑस्कर पुजोलः
अनुसन्धाता, काशीहिन्दुविश्वविद्यालयः, वाराणसी
२/एफ०एफ०, बी०एच०यू० कैम्पस, वाराणसी (उ०प्र०)

डॉ० वागीशशास्त्री इत्युपनाम्ना प्रथितयशसां बहुभाषाविदां वैयाकरणानां विद्यावारिधि-(पी-एच०डी०) — 'वाचस्पति' (डी०लिट्०) इत्युपाधिभृतां पण्डितप्रवराणां श्रीभागीरथप्रसाद-त्रिपाठीनामन्यतमं स्थानं विभ्राजते वाराणसेय-पण्डितमण्डल्या विख्यातविचक्षणेषु। पद्मभूषणः आचार्यबलदेव उपाध्यायः **'काशी की पाण्डित्य परम्परा'** इत्याख्ये ग्रन्थे एतेषां विषये लिखति–

'एवं प्राच्यप्रतीच्योभयविधगवेषणा-विधामर्मज्ञा नव्यमार्गदर्शकाश्च सन्ति विद्वांसः। इमे पाणिनीयधातूनां स्वरूपस्य, अर्थप्रसारस्य लोकप्रसारस्य च विषये गम्भीरचिन्तका वैयाकरणा वर्तन्ते। एते मध्यप्रदेशस्य सागर-मण्डलान्तर्गते 'विलइया' इत्यभिधे ग्रामे १९९१ तमे वैक्रमाब्दे आषाढ़शुक्लत्रयोदश्यां जातेन स्वजनुषा समभूषयन्। पितृचरणानां कान्यकुब्ज-वंशावतंसानां पण्डितयमुनाप्रसादत्रिपाठिनामायुर्वेदतन्त्रज्योतिष-वैदुष्याय प्रसिद्धिरासीत्।'

अध्यापनं सम्पादनञ्च –

१९५४ तमात् ख्रीस्ताब्दादारभ्य वागीश-महोदयानां संस्कृतरचना-प्रकाशनमारब्धम्। एभिः सर्जनात्मके गवेषणात्मकलेखनक्षेत्रे चानति-साधारणी समर्जिता कीर्तिः। वाराणसेये टीका-मणी-संस्कृत-कालेजे पञ्चवर्षाणि समध्या-पनोत्तरं त्रिंशद् वर्षाणि यावत् सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयाय समर्पिताः स्वकीयाः सेवाः। तत्र गवेषणालयनिदेशक-पदमलङ्कुर्वाणैरनु-सन्धानप्रधाना **'सारस्वती सुषमा'** इत्याख्या त्रैमासिकी संस्कृतपत्रिका वर्षाणां सप्तविंशतिं यावत् सम्पादिता, सम्पादिताश्च विस्तृतभूमिका-समलङ्कृता विश्वप्रसिद्धा ग्रन्थमालाः। अभिनव-गुप्ताचार्यस्य गुरुवराणां वामनदत्तानां सहस्राब्दीं यावत् गाढान्धतमसे निमग्नायाः **'संवित्प्रकाशः'** इत्याख्यकृतेः समुद्धारपूर्वकं विहितं सम्पादनम्। प्रवर्तिता च भारतीय-संस्कृतेर्विश्वकोशानां पुराणानां विषयानुक्रमकोशयोजना। संस्कृतानु-संधानप्रविधिमधिकृत्य प्रकाशितमभूत् **'अनुसन्धन-पद्धतिः'** इत्याख्यं पुस्तकं १९६८ तमे ख्रीस्ताब्दे।

नवीनमतस्थापना–

एभिर्व्याकरणे प्राचीनेतिहासे भाषाशास्त्रे च तावद् बहूनि नूतनमतानि स्थापितानि सन्ति। वाग्योगविधितया प्रसिद्धमभिनवं शीघ्रबोधकरं व्याकरणं प्रणीतम्। वैदिके वेदोत्तरसंस्कृत-वाङ्मये च वर्णिताः पुलिन्दाः सुप्रसिद्ध-पुरातत्त्ववेत्रा कनिंघम-महोदयेन महाराष्ट्र-देशीयाः साधिताः। परन्तु वागीशमहोदयैः शिलालेखीयानां वैदिकानां पौराणिकानां च प्रमाणानामाधारेण कनिंघममतस्थापनं निरा-कुर्वाणैः १९६५ तमे वर्षे स्वकीयं नवीनं मतं स्थिरीकृतम्। तच्च महामहोपाध्याय-गोपीनाथ कविराज-डा० सम्पूर्णानन्द-प्राचीनेतिहासविद् डॉ० रामप्रसादत्रिपाठि-डॉ० बाबूरामसक्सेना-डा० रघुवीरसिंह-प्रभृतिभिर्भृशं प्रशंसितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डॉ० कृष्णदत्तवाजपेयिभिस्तु **वागीशशास्त्रिण इतिहासपथिकृतो विद्वांसः**' इति साधितम्। एभिः प्राच्यभारतीयेतिहासलेखने प्रदत्ताः नूतनाः आयामाः। संस्कृत-हिन्द्याङ्ग्ल-पत्रपत्रिकासु शतद्वयाधिकाः समस्या-प्रधानाः प्रकाशिता अनुसन्धान-निबन्धाः।

अन्ताराष्ट्रियख्यातिप्राप्ताः व्याकरणग्रन्थाः

एषामन्ताराष्ट्रियख्यातिप्राप्ताः ग्रन्थाः सन्ति— (१) पाणिनीय - धातुपाठसमीक्षा, (२) तद्धितान्ताः केचन शब्दाः, (३) धात्वर्थ-विज्ञानम्, (४) संस्कृतवाङ्मयमन्थनं च। अमेरिका-देशीयेन संस्कृत-भाषाशास्त्रविदुषा विलियम् ड्वाईट हिट्नीमहोदयेन शताब्दीतः पूर्वं धातुपाठमधिकृत्य कृतानामाक्षेपाणां प्रत्युत्तरे विरचितां पाणिनीय-धातुपाठ-समीक्षामभिलक्ष्य वागीशमहोदया उत्तरप्रदेश-शासनेन तदीन्तन (१९६६ ई०) सर्वोच्चकालिदासपुरस्कारप्रदानेन सम्मानिता अभूवन्।

'धातुपाठविषयकमेषामनुशीलनं गभीरं प्रशंसनीयं चास्ति। एतद्विषयकमेतेषां ग्रन्थद्वय-मतिप्रमेयबहुलं तथ्यपूर्णं नवीदिग्द्योतकं चास्ति।''

—काशी को पाण्डित्यपरम्परा
(द्र० ४९० तमं पृष्ठम्)

व्याकरणशास्त्रे तोलनात्मिकामितिहासात्मिकां समालोचनात्मिकां च प्रणालीमवलम्ब्य शास्त्रि-वर्यैर्विहिता अनेका नूतनाः स्थापनाः। अल्पीयसा कालेन संस्कृतप्रशिक्षणाय विरचितं वाग्योग-विधिनामकं नैसर्गिकं तान्त्रिकव्याकरणम्। एतस्य गुणविशेषण सजायते सार्वभौमः प्रचारः। कस्माच्चिदेकस्मात् प्रसिद्धधातोः सकाशाद् ६४ सहस्रशब्दानां व्युत्पत्तिप्रदर्शयित्री **'वागीश-बीजवृक्षः'** इति कृतिर्विश्वजनीन-जिज्ञासुजनदृशं ममाकर्षति।

संस्कृतस्य निबन्धकारो व्याख्याकारश्च

वाराणसीतः प्रकाशितायां **'पण्डित'** पत्रि-कायाम्, अयोध्यातः प्रकाशिते **'संस्कृतम्'** इत्याख्ये च साप्ताहिके पत्रे १९५४ तमात् ख्रीस्ताब्दारभ्य संस्कृतनिबन्धाः प्रकाशयितुमारब्धाः। १९५४ तमे खीस्ताब्दे **'योग-चमत्कृतिः'** इति नाम्ना निबन्ध-शृङ्खला दशाधिकेष्वङ्केषु प्रकाशिता साप्ताहिके **'संस्कृतम्'** इति पत्रे। **'संस्कृतवाङ्मयमन्थनम्'** इत्याख्यो विशालः समालोचनात्मको गवेषणा-प्रधानः। शास्त्रीयान् विविधविषयान् अधिकृत्य विरचितो निबन्धग्रन्थः १९९० तमे वर्षे प्रकाशितः। एतस्य गुणवैशिष्ट्यात् उत्तरप्रदेशसंस्कृत-अकादम्या शास्त्रिवर्या बाणभट्टपुरस्कारेण राजस्थान-संस्कृतअकादम्या निखिलभारतीय-वेदवेदाङ्गपुरस्कारेण, उत्कलपाठीन्यासेन च गवेषणापुरस्कारेण सत्कृता अभूवन्। पद्मभूषण **आचार्यो बलदेव उपाध्यायः** स्वाभिप्राय प्रकटयन्नाह —

'तत्राधुनिकमनुसन्धानविधा — प्रविधिं निबन्धमालोचना-विधां च क्रोडीकृत्य संस्कृतभाषायां स्वोपज्ञनिबन्ध—प्रणायकेषु वागीशास्त्रीत्युपनाम्ना प्रथितस्य सर्वतन्त्रस्वतन्त्रस्य डा० भागीरथप्रसादत्रिपाठिनः प्रतिभाभास्वरं नाम नूनमङ्गुलिगण्यं प्रतिध्यति। संस्कृतानु-सन्धानपथिकृत्त्वस्य श्रेयोभागेष एव महानुभावो विराजते।'

बाल्यादेव योगाभ्यास-निरतैः कुण्डलिनी-जागरणविषयिणीं सूक्ष्मदृष्टिमुन्मूलयितुं योगचूड़ा-मण्युपनिषदि व्यतानि वितानिकेत्याख्या संस्कृत-व्याख्या तज्जिज्ञासूपकाराय।

अप्राप्यलुप्तविधा-पुनरावाहनप्रधाना रचनाः

अप्राप्तलुप्तविधा-पुनरावाहकाणामेतेषा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माकाशवाणी-रूपकं विशिष्टां ग्रामीणपृष्ठभूमिकामाश्रित्य विरचितं १९५८ तमे ख्रीस्ताब्दे प्रकाशितम्। तदनु विशिष्टां गद्यशैलीमवलम्ब्य प्रणीता **'कथासंवर्तिका'** १९५९ तमे ख्रीस्ताब्दे प्राकाश्यमुपेता। लुप्तप्रायां नर्मविधां **'नमसप्तशती'** (१९६२) इति काव्यतयाऽवातीतरत्। **'आतङ्कवादशतकम्'** (१९८४ ख्रीस्ताब्दे) इति खण्डकाव्यमप्राप्तविधात्वेन समृध्नोति संस्कृतवाङ्मयम्। एवमेव **'टालस्टायकथासप्तकम्'** (१९७०) इति चूर्णिकागद्यरूपं प्रकाशितं सत् सम्पूर्णानन्दसंस्कृतविश्वविद्यालये पाठ्यग्रन्थतया निर्धारितमासीत्। एभिर्वाग्योगध्यानविधिमाविर्भाव्य वाग्योगदर्शनं प्रणीतम्। ध्यानविधिरयं सकले विष्टपे प्रसिद्धिं भजते। एषां परिवारे संस्कृतभाषा मातृभाषात्वेन व्यवह्रियते।

जनसामान्यचित्ताकर्षणाय साहित्यं कार्यक्रमाश्च

संस्कृतं प्रति जनसामान्यस्य ध्यानाकर्षणाय **'भारत में संस्कृत की अनिवार्यता क्यों ?'** इत्येतदीयं पुस्तकं १९७७ तमे ख्रीस्ताब्दे प्रकाशितम्। तदनु सांस्कृतिक-पृष्ठभूमौ १९८० तमख्रीस्तादारभ्य संस्कृतप्रशिक्षणमुपक्रान्तम्। तत्र श्रीगुरुकाव्यसंगीतिका, श्रीगङ्गाकाव्यसंगीतिका श्रीशिवकाव्यसंगीतिकादिकार्यक्रमेषु तत्तद्स्तोत्राणां संगीतिकी प्रस्तुतिर्विधीयते। कार्यक्रमेषु गेयस्तोत्राणां संग्रहा अपि शिवस्तवनचयनिका, श्रीगङ्गास्तवनचयनिकादिनाम्ना प्रकाशिता सन्ति। वाग्योगविध्याश्रितानि संस्कृतप्रशिक्षणशिविराण्यपि समये-समये समायोज्यन्त इत्थमेतदीया संस्कृतसेवा तावदहर्निशं प्रवर्तते।

संस्कृतस्य सार्वभौमः प्रचारः

देशेषु विदेशेषु चैतेषामन्तराष्ट्रियव्याख्यानानि संस्कृतभाषायामाङ्ग्लभाषायां च समायोजितान्यभूवन्। फ्रांसदेशस्य पेरिसनगर्यां (१९७७ ई०), शार्मण्यदेशस्य वाइमारनगर्यां (१९७९ ई०) च समायोजितयोर्विश्वसंस्कृतसम्मेलनयोः श्रीवागीशमहोदयानामायोज्यन्त व्याख्यानानि। बर्लिन-पत्रिकायाम् एतेषां व्याख्यानं प्रकाशितम्। अन्ताराष्ट्रियेषु षष्टिसंख्याकेषु जीवनीकोशखण्डेषु फ्रांसदेशीये **'ल मोन्द'** नामके प्रसिद्धे समचारपत्रे चैतदीयं व्यक्तित्वं कृतित्वं च प्रकाशितमभूत्। इंग्लैण्ड-देशस्थया आई.बी.सी. कैम्ब्रिजसंस्थया च **'सर्टिफिकेट आफ मेरिट्'** इति प्रदानेनैते सम्मानिताः। अमेरिका-देशीयया ए०बी०आई० संस्थया च स्वर्णपदकप्रदानपूर्वकं सभाजिताः।

संस्कृतं विश्वचर्चाविषयतामानीतम् —

भवद्भिर्ज्ञायते यत् १९९९-२००० ख्रीस्ताब्दः संस्कृतवर्षत्वेन समुद्घोषितो वर्तते भारतीयशासनेन। वर्षेऽस्मिन् संस्कृतं प्रति तदीया दृष्टिः कथं समाकृष्टाऽभूत् तत्रोत्प्रेरकश्च को हेतुरासीत् ? श्रीवागीशशास्त्रिवर्याणामुद्यम एव तत्रोत्प्रेरणकारणतामभजत्। १९६८ ख्रीस्ताब्दस्य मईमासतः १९९९ ख्रीस्ताब्दस्य जूनमासं यावदेतेषां संस्कृतविषयकमुच्चारणं विषयीकृत्य समग्रस्य पाश्चात्यजगतो भारतस्य च प्रसिद्धेषु समाचारपत्रेषु पत्रिकासु च सम्पादकीया लेखा निबन्धाश्च प्राकाश्यमानीताः। लन्दनस्थितया बी.बी.सी. दूरदर्शनसंस्थया भारत-स्थिताभिश्च चस्टार—प्रभृतिदूरदर्शनसंस्थाभिर्वागीशमहाभागान् विषयीकृत्यः समाचाराः प्रसारिता वृत्त-चित्राणि चापि प्रदर्शितानि। प्रथमस्तावदयमवसर आसीद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदा नेतृवर्जितस्य कस्यचित् संस्कृतविदुषः सम्बन्ध एतावान् प्रचारो दूरदर्शनैः समाचारपत्रैश्च कृतः स्यात्। विश्वप्रसिद्धया **'मंडोना'** इत्याख्च-पॉप गायिकया प्रगोतस्य श्लोक-कदम्बकस्य श्रीवागीशनिर्दिष्टं संस्कृतदुरुच्चा-रणमधिकृत्य तावदेतादृशो विश्वप्रचारः समजनि संस्कृतभाषायाः। तया च शास्त्रिसकाशात् संस्कृतप्रशिक्षणं प्रतिज्ञातम्। अयं विश्वोत्थितः कोलाहलो भारतीयशासनमाक्रष्टुमशक्नोत् संस्कृतवर्षसमुद्घोषयितुं प्रेरिरच्च। अत्र तावत् केषुचित् समाचारपत्रेषु प्रकाशितस्य तादृग् विधस्य समाचारस्य दिनाङ्काः समुद्ध्रियन्ते-

१- लन्दनस्थिता बी०बी०सी० समाचारसंस्था- —११/५/१९९८ ई०।

२- मैडोना सोंग नाट म्यूजिक टु पण्डित इयर्स —**स्टेट्समैन**, ११/५/१९९८।

३- मैडोनाज् रे ऑव् लाइट : यू०पी० पण्डित सजेष्ट ए टचअप —**इंडियन एक्सप्रेस** ११/५/१९९८।

४- मैडोनास् शांतिमन्त्र फेल्स टु पेसिफाई बनारस पंडिताज् —**द स्टेट्समैन** ११/०५/१९९८

५- मैडोनास् मन्त्र-(एडिटोरियल) —**टाइम्स ऑफ इंडिया**, २६ जून १९९८।

६- मैडोनास् संस्कृत इर्क्स वाराणसी पण्डिताज् —**हिन्दुस्तान टाइम्स**, ११ मई १९९८।

७- पण्डिताज् सी रे ऑव लाइट फॉर मैडोना —**इंडियन एक्सप्रेस**, १६/५/१९९८।

८- वाराणसी स्कालर टु मैडोनास् रेस्क्यु —**हिन्दुस्तान टाइम्स** (लखनऊ), १९/५/१९९८

९- मैटेरियल गर्ल मैडोना आन वे टु लर्न संस्कृत —**द टाइम्स ऑफ इंडिया** (लखनऊ), १९/१०/९८

१०-मैडोना इस कमिंग टु वाराणसी टु लर्न संस्कृत —**द टाइम्स ऑफ इंडिया** (बाम्बे), २०/१०/९८

११-संस्कृत सीखने के लिए हफ्ते भर बनारस में रहेगी मैडोना—**अमर उजाला**, २३/१०/९८

१२-मैडोना ऑन टंग ट्विस्टर ट्रिप —**टेलीग्राफ** (कलकत्ता), १९/१०/१९९८

१३-मैडोना विल पालिश हर संस्कृत एट वाराणसी गुरूज् फीट ?

१४-मैटोना मास्टर : आचार्य वागीशशास्त्री —**द वीक**, २२ नवम्बर १९९८

१५-मैडोना बंधवाएगी अब आचार्य वागीश से गंडा —**दैनिक भास्कर** (इन्दौर), १६/१०/१९९८

१६-मैटेरियल गर्ल ऑन रोड टु लर्न संस्कृत —**द टाइम्स ऑफ इंडिया** (अहमदाबाद) २०/१२/९८

१७-मैडोना गर्ल टु लर्न संस्कृत इन वाराणसी —२१ दिसम्बर १९९८

१८-न्यूजमेकर्स : मैडोनाज् मेंटर —**द टाइम्स आफ इंडिया** ४/२/१९९९

१९-स्टार टी०वी०—३१/१२/१९९८

२०-संस्कृत विश्व स्तर पर जनजीवन को सुखी एवं शान्तिमय बनाने में समर्थ —**दैनिक आज**, ९/२/९९

२१-वाग्योगविधि इंडो-यूरोपीय भाषाओं के शिक्षण में सहायक —**दैनिक जनमुख**, १२/२/९९

२२-विदेशियों का संस्कृत अध्ययन के प्रति रूझान बढ़ा —**दैनिक अमर उजाला**, १३/४/९९

२३-मडोना जाड़ों में बनारस आकर संस्कृत सीखेगी —**नवभारत टाइम्स**, १७ अप्रेल १९९९

२४-मनागरा तमिलपोस्ट—२० मई १९९९

२५-कल्कि (तमिल) ९ मई १९९९

२६-संस्कृत विदाउट टियर्स —**लाइफ पाजिटिव**, जून १९९९

२७-संस्कृतवर्ष विजयताम्-विश्वप्रसिद्धपॉप गायिकाया मैडोनायाः संस्कृत-प्रीतिः —**अमृतभाषा**, जून ९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'वर्ल्ड एसोसियेशन फार वैदिक स्टडीज (वेव्ज)' इत्यस्याः संस्थायाः

※ तृतीयं भारत-सम्मेलनं सम्पन्नम् ※

—श्रीमती शशि तिवारी, सचिवा'
वर्ल्ड एसोसियेशन फार वैदिक स्टडीज (वेव्ज) भारत-शाखायाः
रीडर, मैत्रेयी कालेज (दिल्ली विश्वविद्यालयः)
५४, साक्षर अपार्टमेन्ट्स, ए-३, पश्चिम विहार, नई दिल्ली-११००६३

चाणक्यपुरी-नवदेहल्यां स्थिते विश्वयुवक-केन्द्रे **'वर्ल्ड एसोशियेशन फॉर वैदिक स्टडीज'** इत्यस्याः संस्थायाः भारतशाखायाः तृतीयं द्विदिवसीयं सम्मेलनं २००० तमे वर्षे जनवरी-मासस्य सप्तम्याम् अष्टम्याञ्च तिथौ **'आधुनिक-समस्या-समाधानाय वैदिकी दृष्टिः'** इति विषयमधिकृत्य समायोजितमासीत्।

सम्मेलनस्योद्घाटनं जनवरीमासस्य सप्तम्यां तिथौ दशवादनकाले मुख्यातिथिमहोदयैः विधि-विशेषज्ञैः सांसदैः वरिष्ठभारतीयशिक्षाविद्भिः डा० लक्ष्मीमल्लसिंघवीमहाभागैः वैदिकमंगलाचरणानन्तरं दीपं प्रज्वाल्य कृतम्। उद्घाटनसत्रे दिल्लीविश्वविद्यालयस्य डीन ऑफ कालेजेज डा० एस० एस० राणा, नेहरु मेमोरियल संग्रहालयस्य पुस्तकालस्य च निदेशकः डॉ० ओमप्रकाशकेजरीवाल-महाभागः इत्यादयः अनेके विद्वांसः विशिष्टातिथिरूपेण समुपस्थिताः आसन्। राष्ट्रियसंस्कृतसंस्थानस्य निदेशकः डा० कुटुम्बशास्त्री अस्मिन्नवसरे मुख्यवक्ता आसीत्।

अमेरिकातः भारतसम्मेलनेऽस्मिन् प्रतिभागित्वं कर्तुमुपस्थितैः डा० भूदेवशर्ममहाभागैः, अध्यक्षपदं समलङ्कृतम्। सरस्वतीवन्दनानन्तरं भारतशाखा-सचिव्या डा० शशितिवारीमहाभागया सम्मेलनस्य रूपरेखा प्रमुखातिथीनां परिचयश्च प्रदत्तः। अध्यक्षपदमलङ्कुर्वाणैः डा० के०पी०ए० मेनन-महाभागैः सर्वेषां हार्दिकमभिनन्दनं कृतम्। उद्घाटन सम्बोधने डा० सिंघवी-महाभागैः अस्य सम्मेलनस्य सार्थकताम् अद्यावधिकृतप्रयासान् प्रशंसमानैः आधुनिकसमस्यानां वैदिकदृष्ट्या समाधानमधिकृत्य बहुमूल्यानुशंसाः कृताः। समीचीनमेव तैरुक्तं यद् वैदिकज्ञानं सार्वभौमिकं सार्वकालिकञ्च वर्तते। इदं चिरनवीनं सर्वत्र मानवजीवनाय उपादेयं वर्तते। अन्यैः सर्वैः वक्तृभिरपि वैदिकज्ञानप्राचीनदर्शनादिभिः सम्पूर्णस्य संस्कृतवाङ्मयस्य आधुनिक युगे प्रासंगिकतामधिकृत्य विषयस्य प्रतिपादनं कृतम्। सम्मेलनेऽस्मिन् चतस्रः संगोष्ठ्यः एका परिचर्चा च विषयस्य विभिन्न-पक्षज्ञानमधिकृत्य समायोजिता। सम्मेलनेऽस्मिन् देशस्य विविधेभ्यः प्रदेशेभ्यः समागतैः विदेशेभ्यः अमेरिकातः, इंग्लैण्डतः, मौरिशसतः ट्रिनिडाडतः, पञ्चशताधिकशतभारतीयविद्यादिभूषितैः विद्वद्-वर्यैः प्रतिभागित्वं कृतम्।

सम्मेलनस्य समापनसत्रं हरिद्वारस्थितस्य गुरुकुलकांगड़ीविश्वविद्यालयस्य कुलपतयः डा० धर्मपाल-महाभागाः मुख्यातिथिरूपेण समागताः। समापनवक्तव्यं प्रदत्तं दिल्लीस्थितस्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विद्यापीठस्य कुलपतिपदे विराजमानैः डा० वाचस्पति उपाध्यायमहोदयैः। सर्वे एव श्रोतारः तेषां प्रेरकम् अभिभाषणं श्रुत्वा मुग्धाः सञ्जाताः।

सम्मेलनमिदं विश्वस्तरे भारतीय-विद्यायाः एवं वैदिकज्ञानस्य प्रचारप्रसाराय निजोद्देश्ये पूर्णरूपेण सफलमासीत्। एतेषां कार्यक्रमाणां संयोजिका वेव्जभारतशाखा — सचिवा डा० शशितिवारी आसीत्। ★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

BHARATODAYA Regd. No. SHN/L-13/NP-247/99

मृदिता संस्कृतिरिह

[प्रथमपृष्ठस्य शेषांशः]

(७)

यथा स्याद् विश्वासो बहुजनमतप्राप्तिरभितः
तथा वाण्या लासो जनसदसि कृत्वा दलजनाः ।
विजित्येष्टं क्षेत्रं क्वचिदपि पुनर्द्रष्टुमुदिताः
न चायान्त्यालस्यान्मदमदिरमूढा हृतधनाः ॥

(८)

न राष्ट्रस्योत्थानं हृदि भवति नो संस्कृतिमतिः
भवेत् क्षेत्रोत्थानं युवजनभृतिर्वाऽस्तु खलु नो ।
पदं मंत्रिव्यूहे यदि मिलति भाग्यादिह तदा
भवेन्मेला रैली प्रतिदिवसमिष्टा जनरतिः ॥

(९)

शिलान्यासो नित्य भवतु नगरे मानसरणिः
भवेदुद्घोषाणां विधिरनुदिनं कार्यचरणे ।
श्रियान्धानां वासे भवतु नवभोज्योत्सवसृतिः
स्वदेशे नेतृणां व्यवहरणवृत्तिर्नवनवा ॥

(१०)

समस्या कश्मीरे भवतु भुवमाक्रम्य सुतरां
स्थिता शत्रोः सेना भवतु यदि वा पाकविहिता ।
भवेद् सीमारेखा विघटनमथोल्लंघनमहो
मतार्थं नेतारो विवदनपरः सन्ति समये ॥

(११)

निजा सत्ता लोके भवतु करगा येन विधिना
बलमाश्रित्याचारे व्यवहृतिपराः स्वार्थमतिकाः ।
मदीया नेतारः कथमिह भवेद्राष्ट्रसुगतिः
विहायैते निष्ठां स्वमतपटुकाजेतुमुदिताः ॥

हरिद्वारस्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्

भारतोदयः संस्कृतमासिकम्

गुरुकुलमहाविद्यालयः—२४६४०५ हरिद्वारम् (उ०प्र०)

सेवायाम्, श्री ..... मो० .....

१०५५ श्री पुस्तकालयाध्यक्ष,
वाल्मीकि संस्कृत क्याम्पस
काठमाण्डू (नेपाल)

(१२)

कदा प्रेम्णोद्घोषैरनिशमिह जल्पन् निजगिरं
कदोच्चैर्वन्देऽहं निजजननिभूमि परिवदन् ।
जयत्यस्माकीना विबुधमहिता संस्कृतिसुधा
सुघोषैर्देशेऽस्मिन्निमिषमिव नेष्यामि दिवसान् ॥

(१३)

कदा स्यादुद्घोषो जयतु मम देशो निवसतां
अभिज्ञानं स्वीयं भरतनृपभूमेरपि भवेत् ।
स्वदेशीयेषु स्यादविचलरतिश्चात्र वसतां
स्वभाषां साहित्यं पठतु जनताऽहर्निशमिह ॥

(१४)

मुखस्था वेदोक्ता सुरमुखभवा नास्ति विदुषां
वराकी विभ्राणा विबुधगणबोधानभिनवान् ।
अपेक्षां कुर्वन्ती निजनिखिलकोषार्पणविधौ
प्रतीक्षन्ती दिव्या जयति सुरवाणि कविनुता ॥

मुद्रकेण, प्रकाशकेन डा० हरिगोपालशास्त्रिणा ज्वालापुरीये 'अनुभव प्रिंटिंग प्रेस' मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं मुखपत्रं प्राकाश्यं नीतं हरिद्वारस्थितया ज्वालापुरीयगुरुकुलमहाविद्यालयसभया ।
सम्पादकः डॉ० हरिगोपालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu